Shri Raghunatha Temple MSS. Library,
JAMMU

६१५८

No. १८८९६ क

Title पितृसंहिता

Author

Extent ४ पत्र Age

Subject वेद (यजुः)

६१५८-प्र

(c) Dharmarth Trust. Digitized By eGangotri

सं०१८९६

नं. ५३

(c) Dharmarth Trust. Digitized By eGangotri

अथ पितृसंहिता वाजसनेयी यजुर्वेदे-

पि॰
ट॰ सं॰
१

ओं श्रीगणेशायनमः मधुवाताऋतायतेमधुःक्ष
रन्तिसिंधवः माध्वीर्नःसन्त्वोषधीः मधुनक्तमु
तोषसोमधुमत्पार्थिवꣳरजः मधुद्यौरस्तुनःपि
तामधुमान्नोवनस्पतिः मधुमामस्तुसूर्यःमाध्वी
र्गावोभवंतुनः १ अग्नयेकव्यवाहनायस्वाहासो
मायपितृमतेस्वाहा अपहताअसुरारक्षाꣳसि
वेदिषदः २ येरूपाणिप्रतिमुञ्चमानाअसुराःसं
तः स्वधयाचरंतिपरापुरोनिपुरोयेभरन्त्यग्निष्टा
ल्लोकात्प्रणुदात्यस्मात् २ अत्रपितरोमादयध्वंय
थाभागमावृषायध्वं अमीमदंतपितरोयथाभा
गमावृषायिषत ३ नमोवःपितरोरसाय नमो
वःपितरःशोषाय नमोवःपितरोजीवाय नमो
वःपितरःस्वधायै नमोवःपितरोघोराय नमो
वःपितरोमन्यवे नमोवःपितरःपितरो नमोवो
गृहान्नःपितरोदत्तसतोवः पितरोदेष्म तद्वःपितरोवा
सः ४ आधत्तपितरोगर्भंकुमारंपुष्करस्रजम् यथे
हपुरुषोसत् ५ ऊर्जंवहंतीरमृतंघृतं पयःकीला
लंपरिस्रुतम् स्वधास्थतर्पयतमेपितॄन् ६ कृणु
ष्वपाजःप्रसितिंनपृथ्वीयाहिराजेवामवाꣳ इभेन
तृष्वीमनुप्रसितंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः
७ तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशु
चानः तपूꣳष्यग्नेजुह्वापतंगा नसंदितोविसृज

(c) Dharmarth Trust. Digitized By eGangotri

विश्वशुल्काः ८ प्रतिस्पशो विसृज तूर्णितमो भ
वा पायुर्विशो ऽस्या अदब्धः यो नो दूरे अघशंसो
यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ९ उद
ग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते
यो नो अरातिꣳ समिधान चक्रे नीचा तन्धक्ष्यतसं
न शुष्कम् १० ऊर्ध्वो भव प्रति विध्याध्यस्मदा
विष्कृणुष्व दैव्यान्यग्ने अव स्थिरा तनुहि यातुजूनां
जामिमजामिं प्रमृणीहि शत्रून् अग्निष्ट्वा तेज
सा सादयामि ११ स्वर्वन्तो बर्हिषदꣳ सुवीरं
तꣳ यज्ञꣳ हिन्वन्ति महिषा नमोभिः दधानाः
सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः
१२ यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सु
रया सुतस्य तेन जिन्व यजमानं मदेन सरस्वती रा
मश्विना विन्दमिन्द्रम् १३ यमश्विना नमुचेरासुराद
धि सरस्वत्यसुनोदिन्द्रियाय इमन्तꣳ शुक्रं मधु
मन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि १४
यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः
अहन्तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्ष
यामि अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्
अपाꣳ रेताꣳसि जिन्वति इन्द्रस्यौजसा सादयामि
१६ भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शि
वाभिः दिवि मूर्द्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे
हव्यवाहम् १७ ध्रुवासि धरुणास्तृता विश्वकर्मणा

(c) Dharmarth Trust. Digitized By eGangotri

पि॰
र॰ सं॰
२

2

मा त्वा समुद्र उद्वधीन्मा सुपर्णो व्यथमाना पृथिवी
न्दृꣳह १८ प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्र
स्येमन् व्यचस्वतीम्प्रथस्वतीम्प्रथस्व पृथिव्यसि १९
भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भु
वनस्य धर्त्री पृथिवीन्दृꣳह पृथिवीन्दृꣳह पृथिवी
म्माहिꣳसीः २० विश्वस्मै प्राणाय व्यानायोदानाय प्र
तिष्ठायै चरित्राय अग्निष्ट्वाभिः पातु मह्या स्वस्त्या छर्दि
षा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवे सीदतं २१ का
ण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि एवा नो दू
र्वे प्र तनु सहस्रेण शतेन च २२ पितृभ्यः स्वधायिभ्यः
स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पित
रोमीमदन्त पितरोतितृपन्त पितरः पितरः शुन्धध
म् २३ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पिताम
हाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा पुन
न्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण
शतायुषा विश्वमायुर्व्यश्नवै २४ अग्न आयूꣳषि
पवस आ सुवोर्जमिषं च नः आरे बाधस्व दुच्छुना
म् २५ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा २६
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् अग्ने क्र
त्वा क्रतूꣳरनु २७ यत्ते पवित्रमर्चिष्यग्ने विततम
न्तरा ब्रह्म तेन पुनातु मा २८ पवमानः सो अद्य नः
पवित्रेण विचर्षणिः यः पोता स पुनातु मा २९ उभा

पा

(c) Dharmarth Trust. Digitized By eGangotri

भ्यान्देवसवितः पवित्रेणसवेनचमाम्पुनीहिवि
श्वतः ४४ वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाब
ह्व्यस्तन्वोवीतपृष्ठाः तयामदन्तः सधमादेषुवयꣳ
स्यामपतयोरयीणाम् ४५ येसमानाः समनसः पि
तरोयमराज्येतेषांलोकः यज्ञोदेवेषुकल्पताम् ४६ स्वधानमो
येसमानाः समनसोजीवाजीवेषुमामकाः तेषां
ꣳश्रीर्मयिकल्पतामस्मिंल्लोकेशतꣳसमाः ४७
द्वेसृतीअशृणवम्पितृणामहन्देवानामुतमर्त्या
नाम् ताभ्यामिदंविश्वमेजत्समेतियदन्तरापित
रम्मातरंच ४८ इदꣳहविः प्रजननंमेअस्तुदश
वीरꣳसर्वगणꣳस्वस्तये आत्मसनिप्रजास
निपशुसनिलोकसनि[illegible]भयसनि अग्निः प्रजां पशु
बहुलांमेकरोत्वन्नम्पयोरेतोअस्मासुधत्त ४९
उदीरतामवर उत्परास उन्मध्यमाः पितरः सो
म्यासः असुंयईयुरवृका ऋतज्ञास्तेनोवन्तुपि
तरोहवेषु ५० अङ्गिरसोनः पितरोनवग्वा अथ
र्वाणोभृगवः सोम्यासः तेषांवयꣳसुमतौयज्ञि
यानामपिभद्रेसौमनसेस्याम ५१ येनः पूर्वेपित
रः सोम्यासोनूहिरेसोमपीथंवसिष्ठाः तेभिर्यमः
सꣳरराणोहवीꣳष्युशन्नुशद्भिः प्रतिकाममत्तु ५२
त्वꣳसोमप्रचिकितोमनीषात्वꣳरजिष्ठमनुनेषि
पन्थाम् तवप्रणीतीपितरोन इन्दोदेवेषुरत्नमभ
जन्तधीराः ५३ त्वयाहिनः पितरः सोमपूर्वेकर्माणि

(c) Dharmarth Trust. Digitized By eGangotri

पि-
ट-सं-
३

चक्रुः पवमानधीराः वन्वन्नवातः परिधीरं रपोर्णु
वीरेभिरश्वैर्मघवाभवानः ५० त्वं सोमपितृभिः सं
विदानो नुद्यावापृथिवीआततन्थ तस्मैत इन्द्रो हविषा त
विधेम वयं स्याम पतयो रयीणाम् ५१ बर्हिषदः
पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् त आ
गतावसा शंतमेनाथा नः शंयोररपो दधात ५२ आ
हं पितृन्त्सुविदत्रां अवित्सि नपातं च विक्रमणं
च विष्णोः बर्हिषदो ये स्वधया सुतस्य भजन्त पितस्त
इहागमिष्ठाः ५३ उपहूताः पितरः सोम्यासो बर्हिष्ये
षु निधिषु प्रियेषु त आगमन्तु त इह श्रुवन्त्वधि
ब्रुवन्तु तेवन्त्वस्मान् ५४ आयन्तु नः पितरः सो
म्यासो अग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्व
धया मदन्तो धि ब्रुवन्तु तेवन्त्वस्मान् ५५ अग्निष्वा
त्ताः पितर इहागच्छत सदः सदः सदत सुप्रणीतयः
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववी
रं दधातन ५६ ये अग्निष्वात्ता ये अनग्निष्वाता मध्ये दि
वः स्वधया मादयन्ते तेभ्यः स्वराडसुनीतीमेतां यथा
वशं तन्वं कल्पयाति ५७ अग्निष्वात्तानृतुमतो हवा
महे नाराशंसे सोमपीथं य आशुः ते नो विप्रासः
सुहवा भवन्तु वयं स्याम पतयो रयीणाम् ५८
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत
विश्वे मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरु
षता कराम ५० आसीनासो अरुणीनामुपस्थे

शुषे
यंधत्तदाशुषेमर्त्यायपुत्रेभ्यःपितरस्तस्यवस्वःप्र
यच्छततइहोर्जंदधातन ५२ यमग्नेकव्यवाहन
त्वञ्चिन्मन्यसेरयिम् तन्नोगीर्भिःश्रवाय्यन्देवत्रा
पनयायुजम् ५२ योअग्निःकव्यवाहनःपितॄन्य
क्षदृतावृधः प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृ
भ्यआ ५३ त्वमग्नईडितःकव्यवाहनावाड्ढव्या
निसुरभीणिकृत्वीप्रादाःपितृभ्यःस्वधयातेअक्ष
न्नद्धित्वंदेवप्रयताहवींषि ५४ येचेहपितरोये
चनेहयां २ श्चविद्मयां २ उचनप्रविद्मत्वंवेत्थय
तितेजातवेदःस्वधाभिर्यज्ञंसुकृतंजुषस्व ५५
इदम्पितृभ्योनमोअस्त्वद्ययेपूर्वासोयउपरासईयुः
येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु ना
धा ५६ अथायथानःपितरःपरासःप्रत्नासोअग्नऋत धि
माशुषाणाःशुचिदयन्दीधितिमुक्थशासःक्षामाभि
न्दन्तो अरुणीरपव्रन् ५७ उशन्तस्त्वानिधीमह्यु
शन्तःसमिधीमहि उशन्नुशतआवहपितॄन्ह
विषेअत्तवे ५८ अपांफेनेननमुचेःशिरइन्द्रोदव
र्तयः विश्वायदजयस्पृधःसोमोराजामृतंसुत
ऋजीषेणाजहान्मृत्युमृतेनसत्यमिन्द्रियंविपानं
शुक्रमन्धसइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ५९
इतिश्रीवाजसनेयीसंहितायांपितृसंहितासमा
प्ता शिवहरिॐ ॥

(c) Dharmarth Trust. Digitized By eGangotri

(c) Dharmarth Trust. Digitized By eGangotri